नः	अस्माकम्	हमारे
मघऽवन्	हे धनवन् !	हे धनवाले
शक्र	हे शक्तियुक्त !	हे सामर्थ्य वाले
निः	निः+	–
भेत्	निः + भेत्, क्षपय (भिदेर्लोडर्थेलङि सिपि विकरणस्यलुक्)	छिजाओ
मा	मा	मत
नः	अस्माकम्	हमारे
पात्रा	पान्तिरक्षन्त्याधेयं गर्भमितिपात्राणि स्त्रियः (शेर्लोपः)	स्त्रियों को
भेत्	विनाशय	विनाश करो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहऽजानुषाणि	जानुभ्यांसीदन्तीतिजानुषागर्भास्तैः सह वर्त्तमानानि	गर्भवतियों को

संस्कृतार्थः ।

हे शक्तियुक्त ! धनवन्निन्द्र ! (त्वम्) अस्मान्मा जहि मा परित्यज, अस्माकं प्रियाणि भोग्यानि माऽपहर, अस्माकं गर्भरूपाण्यपत्यानि मा क्षपय, अस्माकं गर्भवतीः स्त्रियः (च) मा विनाशय ॥८॥

भाषार्थः ।

हे सामर्थ्यवाले धनवान् इन्द्र ! आप हमको न मारें, न त्याग करें, आप हमारे प्यारे भोग्य पदार्थों को हरण न करें, आप हमारी गर्भरूप सन्तानों को न छिजावें (और) हमारी गर्भवती स्त्रियों को न नाश करें ॥ ८ ॥

इन्द्रोदेवता त्रिष्टुप्छन्दः ।१।१।१।१।१।१।१।१।

अर्वाङेहिसोमकामंत्वाऽऽहु रयं

सुतस्तस्यपिबामदाय । उरुव्यचा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ।९।

अर्वाङ्	अभिमुखम्	सामने
आ	आ +	–
इहि	आ+इहि, आगच्छ	आओ
सोमऽकामम्	सोमकामम्	सोम की कामना वाले को
त्वा	त्वाम्	तुझ को
आहुः	कथयन्ति	कहते हैं
अयम्	अयम्	यह
सुतः	निष्पीडितः	निचोड़ा गया
तस्य	तम् (कर्म्मणिषष्ठी)	उस को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिब	पिब	पीओ
मदाय	मदाय	मद के लिये
उरुऽव्यचाः	प्रभूतव्यापनः	बहुत फैला हुआ
जठरे	उदरे	पेट में
आ	समन्तात्	खूब
वृषस्व	सिञ्च (वृषसेचने व्यत्ययेनाऽऽत्मनेपदश्नाप्रत्ययौ)	सींचो
पिताऽइव	पितेव	पिता की न्याईं
नः	अस्मान्	हम को
शृणुहि	शृणु ("श्रुशृणु-"इतिसेर्हिः)	सुनो
हूयमानः	आहूयमानः	बुलाया जाता हुआ

संस्कृतार्थः ।

(हे इन्द्र ! त्वमस्मद्-) अभिमुखमागच्छ, त्वां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोमकामं कथयन्ति, अयम् (सोमः) अभिषुतः (अस्ति) प्रभूतव्यापनः (त्वम्) एनं मदाय पिब, जठरे (च) समन्तात् सिञ्च, आहूयमानः (त्वम्) पितेवाऽस्मान् शृणु ॥ ९ ॥

भाषार्थः ।

(हे इन्द्र!) आप (हमारे) सामने आवें आपको सोम की कामना वाला कहते हैं, यह [सोम] निचोड़ा हुआ (है) बहुत फैले हुए आप इस को मद के लिये पीवें (और) पेट में खूब सींचें, बुलाए जाने पर आप पिता की न्याई हम को सुनें ॥ ९ ॥

इति चतुरधिकशततमं सूक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋ०मं०१सू०१०५

विश्वेदेवादेवताः कुत्सऋषिः ।

विनियोगो लैङ्गिकः ।

सूक्तस्य भावार्थः ।

कूपे पतितः कुत्सऋषिरार्यर्चा मनुष्याणामल्पज्ञतां वर्णयन्नवशि-ष्टाभिर्ऋग्भिर्द्यावापृथिव्यो स्वदुःखं ज्ञापयति ॥

चन्द्रसूर्यौ क्रमेणाऽन्तरिक्षदिवोर्गामिनो विज्ञायेते विद्युतां मार्गस्तु मनुष्यैर्नज्ञायते देवैरेवाऽवगम्यते ।१। अस्मिँल्लोके धनाभिलाषिणो धनं लभन्ते, जाया पतिं प्राप्याऽऽत्मानं सर्वतस्तस्मै समर्पयित्वा रतिसुखं प्राप्नोति, मया तु कूपादपि न निर्गम्यते.२। द्युलोकमार्गेण गच्छन् जीवानां प्राणहेतुःसत्यरूपइव सूर्यो नकदापिनश्येत्, वयञ्च पुत्रसुखविहीना न भवेम ।३। पुरातनी दैवीमर्य्यादा कगता? कश्चनूतनोदेव एनांधारयतीति पृच्छायाःप्रतिवाक्यमग्निदेवो निरूपयतु विद्यमानायां पुरातन्यां मर्य्यादा-यां सति च प्राचीने धारयितरि कथंनाम देवानां स्तोत्रा मया कूपनिवास-रूपंदुःखमनुभूयते ।४। पृथिव्यन्तरिक्षद्युषु वर्तमानादेवा दिवः। शास्त्रे विद्यमानास्तारकाश्च यां मर्य्यादांधारयन्ति साकिंरूपा ? तस्यामर्य्या-दायाउल्लङ्घनं चकिंरूपमितिमया न विज्ञायते, कृतेऽपिमर्य्यादोल्लङ्घने जन्मया पुरातनकाले देवानामाह्वानंकृतमासोत् तत्कगतं ? यदिदेवानां समीपमगमिष्यत् तर्हि मम पापराहित्यमप्यभविष्यत् ५ दैवोमर्य्यादायाः कोऽवलम्बः?कथं च वरुणस्तां पर्यवेक्षते यत्केनाप्यात्महानिंविनातस्यो-ल्लङ्घनं न सम्भाव्यते, केन प्रकारेणाऽस्माभिर्ऋतस्यमार्गमनुसर्तव्यं दुष्टानांपीडनंच .कर्तव्यम् । ६ । येनमया पूर्वकाले सोमस्याऽभिषवे स्तोत्राण्युदीरितानि तंमामिदानीं मनस्तापःपीडयति, अतोऽहंजाने ऋ-तस्यमज्ञो नकेनापि तरीतुं शक्यः ।७। बहुबलस्येन्द्रस्यस्तोतारं मां -कू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पनिवासोत्पन्नाः शारीरिक्यो मानस्यश्च व्यथाः पीडयन्ति, अतोऽस्मिँ-ल्लोकऋतस्यैवाऽऽधिपत्यमिति निश्चीयते ।८। विद्युद्रूपस्त्रितआप्त्यो मनुष्याणां सूर्य्येण सनाभितां घोषयति, अतोऽत्र मनस्तापाय नाऽवसरः किन्तु सर्वैः सूर्यवदाह्लादनीयम् ।९। ये मम स्वस्तिके पञ्चनक्षत्राः सन्ति; सहगन्तारस्ते मद्रचितमिदं स्तोत्रं देवेभ्यो निवेदयित्वा निवर्तन्ताम् ।१०। एते द्युलोकीयसंश्रये चन्द्रमसोमार्गमवरुद्ध्य तिष्ठन्ति, अतो मया चन्द्रो न दृश्यते ।११। इदं नूतनं स्तोत्रं मनुष्याणामर्थं कल्याणं घोषयति, नद्यो मर्य्यादामनतिक्रम्य ऋतंप्रेरयन्ति सूर्य्यश्च तमो निवार्य्य सत्यं विस्तारयति १२ अग्नेर्देवेषु बन्धुत्वमस्ति; अतः सोऽस्माकं दुःखं तान् ज्ञापयति, अस्मदर्थं तान् पूजयति च १३ सदेवोऽस्मदी ये यज्ञे मनुष्यहोतेव निषण्णः सन्नस्माकं हवींषि देवान् प्रति प्रेरयतु १४ मन्त्ररूपायाः स्तुतेरचयिता वरुणदेवःखल्वस्ति, स धर्ममार्गस्य ज्ञानाय नूतनैर्ऋषिभिः प्रार्थितः सन्पुरातनं सत्यं तेषां हृदयेन प्रकाशयित्वा नवप्रजाभ्यः पुनःपुनराविष्करोति, १५ दिवि योऽसावादित्यः स साक्षाद्धर्मस्य मार्गएव, मनुष्यास्तमनतिक्रमितव्यं मार्गं न पश्यन्ति १६ कूपे पतितस्त्रितः पूर्वकाले रक्षार्थं देवानाहूतवान् तस्याऽभ्यर्थनं श्रुत्वा स्तुतेरधिष्ठाता बृहस्पतिस्तं कूपादुन्नीतवान, अतः मुमुक्षुः कुत्स इत्थमात्मनोऽर्थं प्रार्थयते १७ यश्चन्द्रमा पथा गच्छन्तं मां सदा दृष्टवानासीत् साम्प्रतं विपत्काले सोऽपि परित्यजति यथा पृष्ठरोगी तष्टा नित्यकर्तव्यं स्वकीयंशिल्पकर्म परित्यजति, द्यावापृथिव्यौमदीयमिदं दुःखमवगच्छताम् १८ वयमनेन स्तोत्रेणेन्द्रयुक्ताः सन्तःशत्रून् सङ्ग्राम अभिभवेम मदीयञ्चेदमभ्यर्थनं मित्रो वरुणोऽदितिः सिन्धुः पृथिवी द्यौश्चाऽऽद्रियन्ताम् ।१९।

विश्वेदेवादेवताः पङ्क्तिश्छन्दः ।८।८।८।८।८।

चन्द्रमाऽअप्स्वन्तरा सुपर्णोधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वते दिवि। नवो हिरण्यनेमयः पदं वि-

न्दन्ति विद्युतो वित्तं मे अस्य रोदसी॥१॥

चन्द्रमाः	चन्द्रमाः	चन्द्रमा
अप्ऽसु	अन्तरिक्षे (आप इत्यन्तरिक्षनाम निघं० १।३)	अन्तरिक्ष में
अन्तः	मध्ये	बीच में
आ	च	और
सुऽपर्णः	(आ०को०) सुपर्णैर्युक्तः सूर्यइत्यर्थः	सूर्य्य
धावते	धावते	दौड़ता है
दिवि	दिवि	द्यौ में
न	न	नहीं
वः	युष्माकम्	आपकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिरण्ययऽ-नेमयः	हे स्वर्णधारोपेताः!	हे सुनहरी घेरे-वालियो
पदम्	पदम्	खोज को
विन्दन्ति	लभन्ते (विदॢ लाभे)	पाते हैं
विऽद्युतः	हे विद्युतः!	हे बिजलियो
वित्तम्	अवगच्छतम् (विद् ज्ञाने)	तुम दोनों जानो
मे	मम	मेरे
अस्य	इदम् (कर्मणि षष्ठी)	इस को
रोदसी०	हे द्यावापृथिव्यौ!	हे द्यौ (और) पृथिवी

संस्कृतार्थः।

चन्द्रमा अन्तरिक्षे सूर्यश्च दिवि धावत, हे स्वर्णधारोपेताः! विद्युतः! (मनुष्याः) युष्माकं पदं न लभन्ते, हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम्। १।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुहे	दुग्धे ('लोपस्त आत्मनेपदेषु' इति तलोपः)	दोहती है

संस्कृतार्थः ।

धनकामा धनं खलु (प्राप्नुवन्ति), जाया च पतिं मिलति, तावुभौ वीर्य्यं प्राप्नुतः (जाया-चाऽऽत्मानम्) सर्वथा समर्पयित्वा रतिसुखं दुग्धे, हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ।२।

भाषार्थः ।

धनकी कामना वाले सचमुच धन को (प्राप्त होते हैं) स्त्री पति से मिलती है, (वे दोनों) वीर्य्य को प्राप्त करते हैं (और स्त्री अपने को) सर्वथा समर्पण करके रति के सुखको दोहती है, हे द्यौ (और) पृथिवी ! आप इस मेरे (दुःख) को जानें ॥२॥

आशय यह है कि जो जिस वस्तु की कामना करता है वह उसको प्राप्त होता है धनकी इच्छा करने वाला धनको, रति के सुख की इच्छा वाला रति के सुख को, परन्तु मैं अभागा जो कूप से बाहर आने की इच्छा करता हूं उस इच्छा को भी पूर्ण नहीं कर सका ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वेदेवादेवताः पङ्क्तिश्छन्दः।८।८।८।८।८।

मोषुदेवाअदःस्व१रवपादिदिव-
स्परि। मासोम्यस्यशम्भुवः शूनेभू-
मकदाचन वित्तंमेअस्यरोदसी। ३।

मो०	मा (उइतिपूरणः)	मत
सु	शोभनम्	सुन्दर
देवाः	हे देवाः !	हे देवताओ
अदः	अदः	यह
स्वः	ज्योतिः	ज्योति
अव	अव +	–
पादि	अव+पादि, प्रभ्रष्टं भवेत् (लिङर्थेलुङयडभावः)	नष्ट हो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ दिवः	दिवः	द्यौ के
१ परि	उपरि	ऊपर
मा	मा	मत
२ सोम्यस्य	सोमार्हस्य	सोम के योग्य के
२ शम्ऽभुवः	सुखस्यभावयितुः	सुखकारी के
२ शूने	अभावे (शिवगतौभावेनिष्ठा)	अभाव में
भूम	भवेम (लिङर्थेलुङिमाङ्यो-गेऽडभावः)	हम होवें
कदा	कदाचन	कभी भी
चन	+चन	–

संस्कृतार्थः ।

हे देवाः ! दिव उपरि (वर्त्तमानम्) अदः शोभनं ज्योतिः प्रभ्रष्टं नभवेत् (वयं च) सोमार्हस्य सुखस्य भावयितुः (पुत्रस्य) अभावे कदापि न भवेम, हे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यावापृथिव्यौ ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ॥ ३ ॥

भाषार्थः ।

हे देवताओ ! द्यौ के ऊपर (रहने वाली) यह सुन्दर ज्योति नष्ट न हो (और) हम में सोम के योग्य सुखकारी [पुत्र] का अभाव कदापि न हो, हे द्यौ [और] पृथिवी ! आप इस मेरे (दुःख) को जानें ॥ ३ ॥

(१) सूर्य्य के नष्ट होजाने से जिस दुःख की संभावना है वह अंधेरे कुए में गिरा हुआ मनुष्य ही अनुभव करसकता है, सूर्य्य केवल ताप और प्रकाश का ही देने वाला नहीं है किन्तु जीवन और सत्य का मूल भी है ॥

(२) पुत्र का अभाव भी बड़ा विपत्तिकर है, क्योंकि जाति और कुलधर्म की रक्षा का हेतु पुत्र ही है ॥

विश्वेदेवादेवताः पङ्क्तिश्छन्दः ।८।८।८।८।८।

यज्ञं पृच्छाम्यवमं स तद्दूतो वि वो-
चति । क्व ऋतं पूर्व्यं गतं कस्तद् बिभ-
र्ति नूतनो वित्तं मे अस्य रोदसी ।४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

य॒ज्ञम्	यज्ञम्	यज्ञ को
पृ॒च्छा॒मि॒	पृच्छामि	पूछताहूं
अ॒व॒मम्	यविष्ठम् (आ०को०)	सबसे अधिक युवा को
सः	सः	वह
तत्	तत्	उस को
दू॒तः	दूतः	दूत
वि	वि+	–
वो॒च॒ति॒	वि+वोचति, प्रतिवक्तु (वचपरिभाषणे लेडथ-डागमः)	उत्तर देवे
क्व॑	क्व	कहां
ऋ॒तम्	दैवी मर्य्यादा	दैवी नियम
पू॒र्व्यम्	पुरातनी	प्राचीन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतम्	गता	गया है
कः	कः	कौन
तत्	ताम्	उस को
बिभर्त्ति	धारयति	धारण करता है
नूतनः	नूतनः	नवीन

संस्कृतार्थः ।

(अहं देवेषु) यविष्ठम् (अग्निरूपम्) यज्ञं पृच्छामि, स दूतस्तत् प्रतिवक्तु यत् पुरातनी दैवीमर्य्यादा क्व गता? को नूतनः (देवः) तां धारयति? हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ।४।

भाषार्थ ।

मैं (देवताओं में) सब से अधिक युवा [अग्निरूप] यज्ञ से पूछताहूं, वह दूत इसका उत्तर दें कि प्राचीन दैवी नियम कहां गया? उसको कौन नवीन (देवता) धारण करता है? हे द्यौ [और] पृथिवी! आप इस मेरे [दुःख] को जानें । ४ ।

प्राचीन दैवी नियम यह है कि व्रतहीन देवविमुख पुरुष को दुःख होता है, मैं देवताओं का स्तोता ऋषि हूं फिर भी मुझे कूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

में पड़ने का कष्ट मिला है इस से प्रतीत होता है कि अब दैवी मर्यादा पलट गई है अथवा उस का धारण करने वाला कोई नवीन देवता है जिसको मैंने नहीं उपासा ॥

विश्वेदेवादेवता निचृत्पङ्क्तिश्छन्दः ।७।८।८।८।८।

अमीयेदेवास्थन त्रिष्वारोचने
दिवः। कद्वऋतंकदनृतं क्वप्रत्नाव
आहुति र्वित्तंमेअस्यरोदसी ।५।

अमी०	अमी	ये
ये	ये	जो
देवाः	हे देवाः !	हे देवताओ
स्थन	स्थ (तस्य थनादेशः)	तुम हो
१ त्रिषु	त्रिषु	तीनों में

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आ	च (आ०को०)	और
१ रोचने	प्रकाशमये (भावेल्युट्)	प्रकाश वाले में
दिवः	द्युलोकस्य	द्युलोक के
१ कत्	किम्	क्या
वः	युष्माकम्	आप का
ऋतम्	दैवीमर्य्यादा	दवी नियम
कत्	किम्	क्या
२ अनृतम्	मर्य्यादाऽतिक्रमः	नियमका उल्लंघन
क्व	किम्	क्या
२ प्रत्ना	पुरातनम्	प्राचीन
वः	युष्माकम्	आपका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आहुतिः	आह्वानम्	आवाहन

संस्कृतार्थः ।

हे देवाः ! अमी ये (यूयम्) त्रिषु (स्थानेषु) द्युलोकस्य रोचमाने (शिखरे) च भवथ युष्माकं दैवी मर्य्यादा का (अस्ति) ? मर्य्यादोल्लङ्घनं किम् (अस्ति) ? युष्माकं पुरातनमाह्वानम् (च) कुत्र (गतम्) ? हे द्यावापृथिव्यौ ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् । ५ ।

भाषार्थः ।

हे देवताओ ! ये जो आप तीनों (स्थानों) में और द्युलोक के प्रकाशमान (शिखर) में हो आपका दैवी नियम क्या (है) ? नियम का उल्लंघन क्या है ? (और) आपका प्राचीन आवाहन कहां गया ? हे द्यौ (और) पृथिवी ! आप इस मेरे (दुःख) को जानें । ५ ।

(१) "तीन स्थान" पृथिवी, जिसमें अग्नि आदि देवता हैं । अन्तरिक्ष, जिसमें वायु आदि । और द्यौ, जिसमें सूर्य्य आदि देवता हैं, द्युलोक की प्रकाशमान शिखर में नक्षत्र देवता हैं । ये सब दैवी मर्य्यादा को धारण करने वाले हैं ॥

(२) इस मर्यादा का उल्लंघन क्या है और कैसे मुझसे हुआ यह ज्ञान मुझ को नहीं है ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) यदि उल्लंघन हुआ भी तो जो पूर्वकाल में मैंने देवताओं का आवाहन किया था वह कहां है? यदि वह देवताओं को पहुंचता तो मैं पाप से अवश्य छूट जाता।

विश्वेदेवादेवता: पङ्क्तिश्छन्दः ।८।८।८।८।८

कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम्। कदर्यम्णो महस्पथा ऽति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥६॥

कत्	किम्	क्या
वः	युष्माकम्	आप के
१ ऋतस्य	नियमस्य	नियम का
१ धर्णसि	धारणम् (सानसिधर्णसि०, इत्यसिच् प्रत्ययान्तो निपात्यते	सहारा
कत्	किम्	क्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ वरु॑णस्य	वरुणस्य	वरुण की
२ चक्ष॑णम्	पर्यवेक्षणम्	देखभाल
कत्	कथम्	किसतरह
१ अर्यम्णः	अर्यम्णः	अर्यमा के
२ महः	महतः	महान के
१ पथा	मार्गेण	रस्ते से
अति॑	अति+	–
क्रामेम	अति+क्रामेम	हम पार हों
दुःऽध्यः	दुर्धियः	दुष्टों को

संस्कृतार्थः।

(हे देवाः!) युष्मदीयनियमस्य कोऽवलम्बः (अस्ति?) वरुणस्य पर्यवेक्षणम्[च] किम् (अस्ति?) महतोऽर्यम्णो मार्गेण कथम् [वयम्] दुर्बुद्धीन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिक्रामेम?, हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ।६।

भाषार्थः ।

(हे देवताओ !) आपके नियम का सहारा क्या (है? और) वरुण की देखभाल किस प्रकार की है? महान अर्यमा के रस्ते से किस प्रकार हम दुष्टों के पार हो सकते हैं ? हे द्यौ [और] पृथिवी ! आप इस मेरे (दुःख) को जानें । ६ ।

(१) किसके सहारे से दैवीनियम ठैरा हुआ है कि जिसको विना आत्महानि के कोई तनिक भी उल्लंघन नहीं कर सकता ।

(२) किस प्रकार वरुण नियमकी पालना करनेवाले और तोडने वाले की देख भाल करते हैं कि कोई भी दंड से नहीं बच सकता।

(३) अर्य्यमा का रस्ता धार्मिक व्यवहार वा नियम का पालन है, किस प्रकार हम धार्मिक व्यवहार वा नियम के पालन में समर्थ हों और उसके द्वारा दुष्टों को जीत सकें ।

विश्वेदेवादेवताः पङ्क्तिश्छन्दः।८।८।८।८।८

अहं सो अस्मि यः पुरा सुते वदामि कानि चित् । तं मा व्यन्त्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ।७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहम्	अहम्	मैं
सः	सः	वह
अस्मि	अस्मि	हूं
यः	यः	जिस ने
पुरा	पुरा	पूर्व काल में
सुते	निष्पीडिते	निचोड़े जानेपर
वदामि	उक्तवानस्मि (भूतेलट्)	कथन किये हैं
कानि	कानि + चित्	कइं एक
चित्	+चित्	-
तम्	तम्	उस को
मा	माम्	मुझ को
व्यन्ति	भक्षयन्ति (वी खादने बाहुलकाद् वणादेशः)	भक्षण करती हैं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आऽध्यः	मानस्योऽध्यथाः (गुणाभावेयणादेशः)	मनकी पीडाएं
वृकः	वृकः	भेड़िया
न	इव	कीन्याइँ
तृष्णाऽजम्	जाततृष्णं पिपासोपेतमित्यर्थः	प्यासे को
मृगम्	मृगम्	हिरणको

संस्कृतार्थः ।

अहं सोऽस्मि यः पुरा (सोमे) निष्पीडिते (सति) बहूनि(स्तोत्राणि)उक्तवानस्मि तं मां मानस्योऽध्यथाः पिपासोपेतं मृगं वृकइव भक्षयन्ति, हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ।७।

भाषार्थः ।

मैं वह हूं जिस ने पूर्वकाल में (सोम) के निचोड़े जाने पर बहुत (स्तोत्र) कथन किये हैं उस मुझ को मनकी पीडाएं प्यासे हिरण को भेड़िये की न्याईं भक्षण करती हैं, हे द्यौ (और) पृथिवी ! आप इस मेरे (दुःख) को जानें ॥ ७॥

तात्पर्य यह है कि मनुष्य ऋषि होने पर भी विना दैव औ की अनुग्रहके दैवी नियम तोड़ने के दंड से नहीं बच सकता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वेदेवादेवता यवमध्यामहाबृहतीछन्दः।८।८।१२।८।८।

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः। मूषो न शिश्ना व्यदन्ति माऽऽध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी।८।

सम्	सम्+	–
मा	माम्	मुझ को
तपन्ति	सम्+तपन्ति सम्यक् पाडयन्ति	अत्यन्त पीडित करते हैं
अभितः	सर्वतः	सब ओर से
१ सपत्नीः ऽइव	सपत्न्यइव (पूर्वसवर्णदीर्घः)	सौतिनों कीन्याइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ पर्शवः	कूपपर्शवः (यास्कः)	कूए के पसवाड़े
मूषः	मूषिकाः (क्विप्प्रत्ययः)	चुहियाँ
न	इव	की न्याई
२ शिश्ना	स्वाङ्गानि (यास्कः,शेर्लोपः)	अपने अंगों क
वि	वि+	–
ऽदन्ति	वि+अदन्ति,भक्षयन्ति	खाती हैं
मा	माम्	मुझ को
आऽध्यः	मानस्यो व्यथाः (गुणाभावे यणादेशः)	मनकी पीडाएं
३ स्तोतारम्	स्तोतारम्	स्तोता को
ते	तव	तेरे
शतक्रतो॰	हे बहुबल !	हे अनेक बलोंवाले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतार्थः ।

मां कूपपर्शवः सपत्न्यइव सर्वतः सम्यक् पीड़-यन्ति,हे बहुबल! (इन्द्र!) तव स्तोतारं मां 'मूषिकाः स्वाङ्गानीव' मानस्यो व्यथा भक्षयन्ति, हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ॥ ८ ॥

भाषार्थः ।

मुझको कूए के पसवाड़े सौतिनों की न्याईं चारों ओर से अत्यन्त पीड़ित करते हैं,हे अनेक बलों वाले (इन्द्र!) आपके स्तोता मुझको मनकी पीडाएं ऐसे खाती हैं जैसे चुहियाँ अपने अंगों को, हे द्यौ (और) पृथिवी ! आप इस मेरे (दुःख) को जानें । ८ ।

(१) कूए के पसवाड़ों के सहारे खड़े रहने से कूए की ईंटें ऐसा दुखित करती हैं जैसे अनेक पत्नियाँ एक पति को।

(२) जैसे चुहियाँ व्यर्थ अपनीपूंछोंको मुंह में लेकर काटती हैं ऐसे मन की व्यथाओं से व्यर्थ में अपने शरीरको क्षीण करा रहा हूं।

(३) इन्द्र का स्तोता होने पर भी मैं ऋत के शासन से नहीं बचसकता इस से प्रतीत होता है कि ऋतही इस सृष्टि में प्रधान है।

विश्वेदेवादेवताः पङ्क्तिश्छन्दः ।८।८।८।८।८।

अमी ये सप्त रश्मयस्तत्रा मे नाभि-

राततो । त्रितस्तद्वेदाऽऽप्त्यः सजा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋ०मं०१ सू०१०५ मं०९ (२६६८)

मित्वायरेभति वित्तंमे अस्यरोदसी।९।

अमी०	अमी	ये
ये	ये	जो
सप्त	सप्त	सात
रश्मयः	किरणाः	किरणें
तत्र	तत्र	वहां
मे	मम	मेरा
नाभिः	सनाभिता	पैतृक संबंध
आऽतता	विस्तृता	फैला है
१ त्रितः	त्रितः	त्रित
तत्	तत्	उस को
वेद	जानाति (विदोलटोवा)	जानता है

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आप्त्यः	अपांपुत्रः	जलोंका पुत्र
सः	सः	वह
१ { जामित्वाय	बन्धुत्वाय	बन्धुपन के लिये
१ रेभति	घोषति (रेभृशब्दे)	पुकारता है

संस्कृतार्थः ।

अमी ये सप्त किरणाः (सन्ति) एषु मम सनाभिता विस्तृता (अस्ति) अपांपुत्रस्त्रितस्तद्विजानाति (अतः)स बन्धुत्वाय घोषति,हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ।९।

भाषार्थः ।

ये जो सात किरणें (हैं) इनमें मेरा पैतृक सम्बन्ध फैला हुआ (है) जलों का पुत्र त्रित यह जानता है (इसलिये) वह बन्धुना के लिये पुकारता है, हे द्यौ (और) पृथिवी ! आप इस मेरे (दुःख) को जानें ॥ ९ ॥

त्रित आप्त्य के लिये देखो पृष्ठ (१३०७), विद्युत जो गरजता है वह यही घोषणा करता है कि हे मनुष्य ! तू जो अपने को दुःखी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

और दीन समझता है तेरी भूल है क्योंकि तेरा पैतृक सम्बन्ध वहां तक फैलता है जहां से सात रंग की किरणें निकलती हैं अर्थात् सूर्य्य देवता से तेरा निकास है, इसलिये तू अपने को जान और सब अवस्थाओंमें सूर्य्य की न्याईं हर्षित रह।

विश्वेदेवादेवताः पङ्क्तिच्छन्दः।८।८।८।८।८।

अमीयेपञ्चोक्षणो मध्येतस्थुर्म-
होदिवः। देवत्रानुप्रवाच्यं सध्रीची-
नानिवावृतु र्वित्तंमेअस्यरोदसी।१०।

अमी०	अमी	ये
ये	ये	जो
१ पञ्च	पञ्च	पांच
१ उक्षणः	वीराः	वीर
मध्ये	मध्ये	बीच में

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्थुः	तस्थुः	ठैरे हुए हैं
महः	महतः	महान के
दिवः	द्युलोकस्य	द्युलोक के
देवऽत्रा	देवेषु (सप्तम्यर्थे त्रा प्रत्ययः)	देवताओं में
नु	क्षिप्रम्	शीघ्र
प्रऽवाच्यम्	रचितवाक्यम् (ग्रा०को०)	रचित वाक्य को
सध्रीचीनाः	सहगन्तारः (सहस्यसध्र्यादेशः)	इकट्ठे चलने वाले
नि	नि+	--
वव्रतुः	नि+ववृतुः, निवर्तन्ताम् (व्यत्ययेन परस्मैपदम् लोडर्थेलिट्)	लौटें

संस्कृतार्थः ।

येऽमी पञ्च वीरा महतो द्युलोकस्य मध्ये तस्थुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहगन्तारः (ते मदीयमिदम्) रचितवाक्यं शीघ्रं देवेषु (वाहयित्वा) निवर्तन्तां, हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्)अवगच्छतम् ॥१०॥

भाषार्थः।

ये जो पांच बीर महान द्युलोक के बीच ठहरे हुए हैं इकट्ठे चलने वाले वे (मेरे इस) रचित वाक्य को शीघ्र देवताओं में (पहुंचा कर) लौटें, हे द्यौ (और) पृथिवी! आप इस मेरे (दुःख) को जानें ॥ १० ॥

(१) पांच वीर किसी नक्षत्र के पांच तारे हैं जो ऋषि को कूप में से सिर के ऊपर दीखते थे।

विश्वेदेवादेवताः पङ्क्तिश्छन्दः।८।८।८।८।८।

सुपर्णाएतआसते मध्यआरोधने दिवः। तेसेधन्तिपथोवृकं तरन्तं यह्वतीरपो वित्तंमेअस्यरोदसी।११।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुऽपर्णाः	सुपक्षाः	सुन्दर पांखों वाले
एते	एते	ये
आसते	आसते	बैठते हैं
मध्ये	मध्यभागे	मध्यभाग में
आऽरोधने	प्रतिबन्धने	आड़ में
दिवः	द्युलोकस्य	द्युलोक की
ते	एते	ये
सेधन्ति	अपसारयन्ति	हटाते हैं
पथः	मार्गात्	रस्ते से
वृकम्	चन्द्रमसम् (यास्कः)	चन्द्रमा को
तरन्तम्	अतिक्रामन्तम्	उलांघते हुए को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यह्वती:	महत् (निघं०३।३)	महान को
अप:	अन्तरिक्षम् (निघं० १।३)	अन्तरिक्ष को

संस्कृतार्थः।

एते सुपक्षा द्युलोकस्य प्रतिबन्धने मध्यभाग आसते, एते महदन्तरिक्षमतिक्रामन्तं चन्द्रमसं मार्गादपसारयन्ति, हे द्यावापृथिव्यौ ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ॥ ११ ॥

भाषार्थः।

ये सुन्दर पांखों वाले द्युलोक की आड़ के बीचमें बैठे हैं, ये महान अन्तरिक्ष को उलांघते हुए चन्द्रमा को रस्ते से हटाते हैं, हे द्यौ (और) पृथिवी ! आप इस मेरे (दु:ख) को जानें ॥ ११ ॥

सुन्दर पांखों वाले पक्षी वही पांच तारे हैं जो ऋषि को सिर के ऊपर दीखते थे, चन्द्रमा ठीक सिर के ऊपर न आने से कूए में से दृष्टिगत नहीं होता, मानो ये पांच पक्षी आकाश का रस्ता रोके बैठे हैं और चन्द्रमा को द्यौ के मध्यभाग से हटा देते हैं ॥

विश्वेदेवादेवता: पङ्क्तिश्छन्दः ।८।८।८।८।८

नव्यंतदुक्थ्यंहितं देवासःसुप्रवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चनम्। ऋतमर्षन्तिसिन्धवः सत्यं

तातानसूर्यो वित्तंमेअस्यरोदसी॥१२॥

१ नव्यम्	नव्यम्	नवीन
तत्	एतत् (एकारलोपश्छान्दसः)	यह
उक्थ्यम्	प्रशस्यम् (निघं०३।८)	प्रशंसनीय
हितम्	हितम्	हितकारी
देवासः	हे देवाः! (जसोऽसुगागमः)	हे देवताओ
सुऽप्रवाचनम्	कल्याणघोषकम्	कल्याण का ढंढोरा फेरने वाला
२ ऋतम्	दैवं नियमम्	दैवी नियम को
१ अर्षन्ति	प्रेरयन्ति (अर्तेर्लेटिबिपिगुणः)	प्रेरण करती हैं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ सिन्धवः	नद्यः	नदियाँ
३ सत्यम्	सत्यम्	सत्य को
ततान	विस्तारयति (लडर्थेलिट्)	फैलाता है
१ सूर्य्यः	सूर्य्यः	सूर्य्यः

संस्कृतार्थः।

हे देवाः! एतन्नव्यम् (स्तोत्रम्) प्रशस्यं हितं कल्याणघोषकम् (चाऽस्ति) नद्यो दैवं नियमं प्रेरयन्ति सूर्य्यः (च) सत्यं विस्तारयति, हे द्यावापृथिव्यौ! [युवाम्] मदीयमिदम् (दुःखम्) जानीतम्।१२।

भाषार्थः।

हे देवताओ! यह नवीन (स्तोत्र) प्रशंसा के योग्य हितकारी [और] कल्याण का ढंढोरा फेरने वाला (है) नदियाँ देवताओं के नियम को प्रेरण करती हैं (और) सूर्य्य सत्य को फैलाता है, हे द्यौ [और] पृथिवी! आप इस मेरे [दुःख] को जानें।१२।

(१) यह स्तोत्र नया इसलिये है कि कूप में गिरी हुई अवस्था में कुत्सऋषि ने ही इस को पहले पहल देखा है।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२) नदियाँ कदापि सृष्टि नियम को उल्लंघन नहीं करतीं, सदा ऋत के अनुकूल चलने से मनुष्यों के लिये एक आदर्श हैं।

(३) सूर्य्यभगवान अन्धकार को निवारण करके सत्य को प्रकट करते हैं, अन्धकार ही झूठ का आश्रय है, प्रकाश सत्य का रूप है इस के चिन्तन से भी असत्य का नाश होता है।

विश्वेदेवादेवताः पङ्क्तिश्छन्दः ।८।८।८।८।८

अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम्। स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी॥१३॥

अग्ने	हे अग्ने !	हे अग्नि
तव	तव	तेरा
त्यत्	तत्	वह
उक्थ्यम्	प्रशस्यम्	प्रशंसनीय
देवेषु	देवेषु	देवताओं में

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्ति	अस्ति	है
आप्यम्	बन्धुत्वम्	बन्धुता
सः	सः	वह
नः	अस्माकम्	हमारे
सत्तः	निषण्णः	बैठा हुआ
मनुष्वत्	मनुष्यइव (तत्रतस्यैवेतिषष्ठ्यर्थे वतिः)	मनुष्य की न्याईं
आ	समन्तात्	चारों ओर से
देवान्	देवान्	देवताओं को
यक्षि	यज (शपोलुक्)	यजन करो
विदुःऽतरः	अतिविद्वान्	अत्यन्त विद्वान्

संस्कृतार्थः ।

हे अग्ने ! देवेषु तव तद् बन्धुत्वं प्रशस्यमस्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुष्य-(होता) इवाऽस्माकम् (यज्ञे) निषण्णोऽति-विद्वान् (त्वम्) देवान् यज, हे द्यावापृथिव्यौ ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ॥१३॥

भाषार्थः।

हे अग्नि ! देवताओं में वह आपकी बन्धुता प्रशंसनीय है, मनुष्य-(होता) की न्याईं हमारे (यज्ञ में) बैठे हुए अत्यन्त विद्वान् आप देवताओं का यजन करें, हे द्यौ (और) पृथिवी ! आप इस मेरे (दुःख) को जानें ॥ १३ ॥

देवताओं के बन्धु होने से अग्नि की देवताओं में पहुंच है, वह हमारे दुःख को देवताओं में ज्ञात करा सकते हैं और हमारे लिये उनका पूजन करके उनको हम पर प्रसन्न करा सकते हैं ।

विश्वेदेवादेवताः पङ्क्तिश्छन्दः ८।८।८।८।८

सत्तोहोतामनुष्वदा देवाँअच्छा विदुष्टरः। अग्निर्हव्यासुषूदति देवो देवेषुमेधिरो वित्तंमेअस्यरोदसी॥१४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्तः	निषण्णः	बैठा हुआ
होता	होता	होता
मनुष्वत्	मनुष्य इव	मनुष्य की न्याईं
आ	(पूरणः)	–
देवान्	देवान्	देवताओं को
अच्छ	प्रति	की ओर
विदुःऽतरः	अतिविद्वान्	अत्यन्त विद्वान्
अग्निः	अग्निः	अग्नि
हव्या	हव्यानि (शेर्लोपः)	हवियों को
सुसूदति	प्रेरयतु (लेट्यडागमे शपः श्लुश्छान्दसः)	प्रेरण करे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दे॒वः	देवः	देव
दे॒वेषु॑	देवेषु	देवताओं में
मेधि॑रः	मेधायुक्तः (अस्त्यर्थे इरच्)	विशेष बुद्धिवाला

संस्कृतार्थः ।

मनुष्य-(होता) इव (अस्माकं यज्ञे) निषण्णो होताऽतिविद्वान् देवेषु [च] मेधावी देवोऽग्निर्देवान् प्रति हव्यानि प्रेरयतु, हे द्यावापृथिव्यौ ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् । १४ ।

भाषार्थः ।

मनुष्य-(होता) की न्याईं (हमारे यज्ञमें) बैठे हुए होता, अत्यन्त विद्वान् (और) देवताओं में विशेष बुद्धिमान् देवता अग्नि, देवताओं के प्रति हवियों को प्रेरण करें, हे द्यौ (और) पृथिवी ! आप इस मेरे (दुःख) को जानें । १४ ।

विश्वेदेवादेवताः पङ्क्तिश्छन्दः ८।८।८।८।८

ब्र॒ह्मा॑ कृ॒णोति॒ वरु॑णो गातु॒विदं॒ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मीमहे । व्यूर्णोतिहृदामतिं नव्यो

जायतामृतं वित्तंमे अस्यरोदसी ।१५।

ब्रह्म	मन्त्ररूपांस्तुतिम्	मन्त्ररूप स्तुति को
कृणोति	रचयति	रचता है
वरुणः	वरुणः	वरुण
गातुऽविदम्	मार्गस्य ज्ञातारम्	मार्ग के जानने वाले को
तम्	तम्	उस को
ईमहे	याचामहे (निघं० ३।१९)	हम प्रार्थना करते हैं
वि	वि +	–
ऊर्णोति	वि + ऊर्णोति, प्रकाशयति,	प्रकाशित करता है

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हृदा	हृदयेन	हृदय के द्वारा
मतिम्	स्तुतिम्	स्तुति को
नव्यः	अभिनवम् (लिङ्गव्यत्ययः)	नये सिरे से
जायताम्	जायताम्	प्रकट हो
ऋतम्	सत्यम्	सत्य

संस्कृतार्थः।

मन्त्ररूपां स्तुतिं वरुणो रचयति (वयम्) मार्गस्य ज्ञातारं तं याचामहे, (सः) हृदयेन स्तुतिं प्रकाशयति [तेन] अभिनवं सत्यं जायतां, हे द्यावापृथिव्यौ ! (युवाम्) मदीयम् इदम् (दुःखम्) अवगच्छतम् ।१५।

भावार्थः।

मंत्ररूप स्तुति को वरुणदेव रचते हैं हम उस मार्ग के जानने वाले से प्रार्थना करते हैं (वह) हृदय द्वारा स्तुति को प्रकाशित करते हैं (उस से) फिर सत्य उत्पन्न हो, हे द्यौ [और] पृथिवी ! आप इस मेरे (दुःख) को जानें। १५।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदमंत्ररूप स्तुति को वरुण देवता रचते हैं, और ऋषि के प्रार्थना करने पर उसके हृदय द्वारा स्तुति को प्रकाशित करते हैं इस प्रकाशन से फिर सत्य के ज्ञान की उत्पत्ति होती है, वेद में पुनरुक्ति का यही कारण है, यद्यपि नए सूक्तों में वही सचाइयाँ। हैं जो पुराने सूक्तों में हैं, परन्तु नए मनुष्यों के लिये उन का ज्ञान फिर उस समयके नए ऋषियों के द्वारा ही प्रकाशित होता है।

विश्वेदेवादेवताः पङ्क्तिश्छन्दः ।८।८।८।८।८

असौयःपन्थाआदित्यो दिविप्र-
वाच्यंकृतः।नसदेवाअतिक्रमे तंम-
र्तासोनपश्यथ वित्तंमेअस्यरोदसी॥१६

असौ	असौ	यह
यः	यः	जो
१ पन्थाः	मार्गः	मार्ग
आदित्यः	आदित्यः	आदित्य
दिवि	दिवि	द्यौ में

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रऽवाच्यम्	प्रकर्षेण स्तोतव्यं यथास्यात्तथा (क्रियाविशेषणम्)	अत्यन्त स्तुति के योग्य
कृतः	कृतः	किया हुआ है
न	न	नहीं
सः	सः	वह
देवाः	हे देवाः !	हे देवताओ
अतिऽक्रमे	अतिक्रमितव्यः ("कृत्यार्थे तवैकेन" इतिकेन् प्रत्ययः)	उलांघने योग्य
तम्	तम्	उस को
मर्तासः	हे मनुष्याः !	हे मनुष्यो
न	न	नहीं
पश्यथ	पश्यथ	देखते हो

संस्कृतार्थः ।

हे देवाः ! योऽसावादित्यरूपो मार्गो द्युलोके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकर्षेण स्तुतियोग्यः कृतः (अस्ति) स नातिक्रमितव्यः, हे मनुष्याः! (यूयम्) तं न पश्यथ, हे द्यावापृथिव्यौ! (युवाम्) मदीयमिदम् (दुःखम्) अवगच्छतम् ॥१६॥

भाषार्थः।

हे देवताओ! जो यह सूर्य्य रूप मार्ग द्युलोक में अत्यन्त स्तुति के योग्य बना हुआ है वह उलांघने योग्य नहीं है, हे मनुष्यो! तुम उसको नहीं देखते हो, हे द्यौ (और) पृथिवी! आप इस मेरे (दुःख) को जानें ॥१६॥

(१) मार्ग अर्थात् दैवीनियम वा ऋत, ऋषि सूर्य्य में साक्षात् ऋत का प्रत्यक्ष अनुभव करते हैं, मनुष्य इस को नहीं देखते, वे सूर्य में केवल प्रकाश और ताप का अनुभव करते हैं।

विश्वेदेवा देवताः पङ्क्तिश्छन्दः ।८।८।८।८।८

त्रितः कूपेऽवहितो देवान्हवत ऊतये। तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रितः	त्रितः	त्रित ने
कूपे	कूपे	कूए में
अवऽहितः	निक्षिप्तः	गिरा हुआ
देवान्	देवान्	देवताओं को
हवते	आहूतवान् [लङर्थेलट्]	बुलाया
ऊतये	रक्षार्थम्	रक्षा के लिये
तत्	तत्	उस को
शुश्राव	शुश्राव	सुना
बृहस्पतिः	बृहस्पतिः	बृहस्पति ने
कृण्वन्	कुर्वन्	करता हुआ
अंहूरणात्	पापरूपात् (सा० भा०)	पापरूप से

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उरू	विस्तीर्णं यथेच्छ-गतियुक्तमित्यर्थः	इच्छानुकूल चलने वाले को

संस्कृतार्थः ।

कूपे निक्षिप्तस्त्रितो रक्षार्थं देवानाहूतवान् (एनम्) पापरूपात् (कूपादुन्नीय) यथेच्छगतियुक्तं कुर्वन् बृहस्पतिस्तत् (आह्वानम्) शुश्राव, हे द्यावा-पृथिव्यौ ! (युवाम्) इदंमदीयम् (दुःखम्) अवगच्छ-तम् ॥ १७ ॥

भाषार्थः ।

कूए में गिरे हुए त्रित ने रक्षा के लिये देव-ताओं को बुलाया,(इसको) पापरूप(कूए) से(निकाल कर) इच्छानुकूल चलने वाला बनाते हुए बृहस्पति ने उस (पुकार) को सुना, हे द्यौ (और) पृथिवी ! आप इस मेरे दुःख को जानें ।१७।

किसी समय कोई त्रित नाम वाले ऋषि कूए में गिरे थे और देवताओं को पुकारने से बृहस्पति (अर्थात् स्तोत्र पर ईशन करने वाले देवता) ने उनको पाप से निर्मुक्त किया था जिससे वह कूए से निकलकर इच्छानुकूल चलने फिरने लगे (देखो बृहद्देवता ३-१३२, १३३, १३६) इसी प्रकार से यह कुत्सऋषि भी अपने लिये छुटकारा मांगते हैं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वेदेवादेवताः पङ्क्तिश्छन्दः ।८।८।८।८।८

अ॒रु॒णो मा॑ स॒कृद्वृकः॑ प॒था यन्तं॑ द॒दर्श॒ हि । उज्जि॑हीते नि॒चाय्या॒ तष्टे॑व पृष्ट्याम॒यी वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥१८

अ॒रु॒णः	आरोचमानः [यास्कः]	प्रकाशमान
मा॒	माम्	मुझ को
स॒कृत्	सदा [श्रा०को०]	सदा
वृकः॑	चन्द्रमाः (यास्कः)	चन्द्रमा
प॒था	मार्गेण	रस्ते से
यन्त॑म्	गच्छन्तम्	जाते हुए को
द॒दर्श॑	ददर्श	देखता था

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हि	एव	हि
उत्	उत्	–
जिहीते	उत्+जिहीते परित्यजति	छोड़ जाता है
निऽचाय्य	दृष्ट्वा	देखकर
तष्टाऽइव	तष्टेव	तक्षक की न्याई
पृष्टिऽ-आमयी	पृष्ठरोगी [स्पृश्यतेऽनेनेतिपृष्टः, छान्दसोवर्णलोपः पृष्टौ पृष्ठे-आमयो रोगोयस्य तथोक्तः]	पीठ में रोग वाला

संस्कृतार्थः ।

आरोचमानश्चन्द्रमा मार्गेण गच्छन्तं मां सदा ददर्शैव, (इदानीं तु) पृष्ठरोगी तष्टेव दृष्ट्वा परित्यजति हे द्यावापृथिव्यौ! (युवाम्) इदंमदीयम् (दुःखम्) अवगच्छतम्। १८।

भाषार्थः ।

प्रकाशमान चन्द्रमा रस्ते से जाते हुए मुझको सदा देखता ही था (परन्तु अब) पीठपर रोग वाले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तक्षक की न्याईं छोड़ जाता है, हे द्यौ (और) पृथिवी ! आप इस मेरे (दुःख) को जानें।१८।

जैसे पीठ के रोग वाला तक्षक (बढई) जिस काम को नित्य करता था उसको भी परित्याग कर देताहै इसी प्रकार चन्द्रमा मुझ को यद्यपि पहले सदा देखता था परन्तु अब इस विपत्ति के समय में छोड़ कर चलाजाता है अर्थात कूए में से नहीं दीख पड़ता।

विश्वेदेवादेवतास्त्रिष्टुप्छन्दः । ११।११।११।११

एनाङ्गूषेणवयमिन्द्रवन्तोऽभिष्याम वृजनेसर्ववीराः। तन्नोमित्रोवरुणो मामहन्तामदितिःसिन्धुःपृथिवी उतद्यौः ।१९।

एना	अनेन (एनादेशे कृते द्वितीया या आजादेशः)	इस से
आङ्गूषेण	स्तोत्रेण (या० को०)	स्तोत्र से

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वयम्	वयम्	हम
इन्द्रऽवन्तः	इन्द्रयुक्ताः	इन्द्र से युक्त
अभि	अभि+	--
स्याम	अभि+स्याम, अभिभवेम	जीतें
वृजने	सङ्ग्रामे (श्रा० को०)	युद्ध में
सर्वऽवीराः	सर्ववीरोपेताः	सम्पूर्ण वीरों से युक्त
तत्	एतत्	इस को
नः	अस्माकम्	हमारी
मित्रः	मित्रः	मित्र
वरुणः	वरुणः	वरुण
ममहन्ताम्	आद्रियन्ताम्	आदर करें
अदितिः	अदितिः	अदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिन्धुः	सिन्धुः	समुद्र
पृथिवी	पृथिवी	पृथिवी
उत	च	और
द्यौः	द्यौः	द्यौ

संस्कृतार्थः ।

अनेन स्तोत्रेणेन्द्रयुक्ताः (सन्तः) सर्ववीरोपेता वयं सङ्ग्रामे (शत्रून्) अभिभवेम, एतदस्माकम् (अभ्यर्थनम्) मित्रो वरुणोऽदितिः सिन्धुः पृथिवी द्यौश्चाऽऽद्रियन्ताम् ॥ १९ ॥

भाषार्थः ।

इस स्तोत्र के द्वारा इन्द्र से युक्त (हुए २) सम्पूर्ण वीरों से युक्त हम युद्ध में (शत्रुओं को) जीतें, इस हमारी (प्रार्थना) को मित्र, वरुण, अदिति, समुद्र, पृथिवी, और द्यौ आदर करें ॥ १९ ॥

इतिपञ्चाधिकशततमं सूक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋ०मं०१सू०१०६ ।

विश्वेदेवादेवताः कुत्सऋषिः ।

विनियोगो लैङ्गिकः ।

सूक्तस्य भावार्थः ।

वयं रक्षार्थमिद्रंमित्रंवरुणमग्निमदितिं मारुतं गणञ्चाह्वयामः ।१। त आगत्याऽस्मान् पूर्णतया रक्षन्तु युद्धेषु चाऽस्माकं कुशलं सम्पादयन्तु।२। शोभनकीर्तियुक्ताअस्माकं पितरो नियमस्य वर्धयित्र्यौ द्यावापृथिव्यौ चाऽस्मान् रक्षन्तु ।३। वयमत्र मनुष्यैःस्तुतमग्निं वीराणामीशितारं पूषणं च स्तोत्रैः प्रार्थयामः ।४। आस्तिक्यबुद्धेःप्रेरको बृहस्पतिरस्मान् सदा सुमार्गेण नयतु वयं तं स्वास्थ्यार्थं भयराहित्यार्थं च प्रार्थयामः ।५। कुत्सऋषिः कूपेपतितः सन् रक्षार्थमिन्द्रमाहूतवान्, तथावयमप्याह्वयामः, सर्वेदेवा अस्मान् सर्वस्मात् पापान्निर्गमय्य सुमार्गे स्थापयन्तु यथा रथः कठिनान्मार्गान्निर्गमय्य सुमार्गे स्थाप्यते। ६ । सर्वैर्देवैः सहिताऽदितिर्देव्यस्मान्नितरां गोपायतु, रक्षाभिमानी देवश्चाऽप्रमाद्यन् सन् रक्षतु, एतदस्मदभ्यर्थनं मित्रोवरुणोऽदितिः सिन्धुः पृथिवी द्यौश्चाऽऽद्रियन्ताम् ।७।

विश्वेदेवादेवता जगतीछन्दः ।१२।१२।१२।१२।

इन्द्रं॑ मि॒त्रं वरु॑णम॒ग्निमू॒तये॒ मारु॑-

तं॒ शर्धो॒ अदि॑तिं हवामहे। रथं॒ न दु॒र्गा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वसवःसुदानवो विश्वस्मान्नोअं-
हसोनिष्पिपर्तन ।१।

इन्द्रम्	इन्द्रम्	इन्द्र को
मित्रम्	मित्रम्	मित्र को
वरुणम्	वरुणम्	वरुण को
अग्निम्	अग्निम्	अग्नि को
ऊतये	रक्षाऽर्थम्	रक्षा के लिये
मारुतम्	मरुत्सम्बन्धिनम्	मरुत् संबंधी को
शर्धः	गणम्	गण को
अदितिम्	अदितिम्	अदिति को
हवामहे	आह्वयामः	हम बुलाते हैं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथम्	रथम्	रथ को
न	इव	की न्याईं
दुर्गात्	कठिनात्	कठिन से
१ वसवः	हे वसवः !	हे वसुदेवताओ
सुदानवः	हे कल्याणदानाः ! (यास्कः)	हे कल्याण के देने वालो !
विश्वस्मात्	सर्वस्मात्	सम्पूर्ण से
नः	अस्मान्	हम को
अंहसः	पापात्	पाप से
निः	निः+	–
पिपर्तन	निः+पिपर्तन, निर्गमय्यरक्षत (पृपालन लोटि तनबादेशः)	निकाल कर रक्षा करो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतार्थः।

(वयम्) रक्षाऽर्थमिन्द्रं मित्रं वरुणमग्निं मारुतं गणमदितिम् (च) आह्वयामः, हे कल्याणदानाः! वसवः! अस्मान् सर्वस्मात् पापान्निर्गमय्य रक्षत यथा रथं कठिनात् (मार्गान्निर्गमय्य रक्षन्ति)॥१॥

भाषार्थः

हम रक्षा के लिये इन्द्र को, मित्र को, वरुण को, अग्नि को, मरुद् गणको (और) अदिति को बुलाते हैं, हे कल्याण के देने वाले वसु देवताओ! संपूर्ण पाप से निकालकर हमारी रक्षा करो जैसे रथ को कठिन (रस्ते) से (निकालकर रक्षा करते हैं)॥ १ ॥

वसु के लिये देखो पृ० ११११

विश्वेदेवादेवता जगतीछन्दः ।१२।१२।१२।१२।

त आदित्या आगता सर्वतातये भूतदेवा वृत्रतूर्येषु शम्भुवः । रथंन दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन । २ ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ते	ते	वे
आदित्याः	हे आदित्याः !	हे आदित्यो
आ	आ+	–
गत	आ+गत,आगच्छत (शपोलुक्)	आओ
सर्वऽतातये	सर्वंत्रातये (रस्यलोपश्छान्दसः)	पूरी रक्षा के लिये
भूत	भवत (शपोलुक)	आप हों
देवाः	हे देवाः !	हे देवताओ
वृत्रऽतूर्येषु	सङ्ग्रामेषु (निघं० २।१७)	युद्धों में
शम्ऽभुवः	सुखस्य भावयितारः	सुखके देने वाले

संस्कृतार्थः ।

हे आदित्याः ! देवाः ! ते (यूयमस्माकम्) पूर्णरक्षायायागच्छत,सङ्ग्रामेषु सुखस्य भावयितारः (च)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवत, हे कल्याणदानाः ! वसवः ! अस्मान् सर्वस्मात् पापान्निर्गमय्य रक्षत यथा रथं कठिनात् (मार्गान्निर्गमय्य रक्षन्ति) ॥ २ ॥

भाषार्थः ।

हे आदित्य देवताओ ! वे आप (हमारी) पूर्ण रक्षा के लिये आवें (और) युद्धों में सुख के देने वाले होवें, हे कल्याण के देने वाले वसु देवताओ ! संपूर्ण पाप से निकालकर हमारी रक्षा करो जैसे रथ को कठिन (रस्ते)से (निकालकर रक्षा करते हैं ।।२।।

विश्वेदेवादेवता जगतीछन्दः ।१२।१२।१२।१२।

अवन्तुनःपितरःसुप्रवाचनाउत
देवीदेवपुत्रेऋतावृधा । रथंनदुर्गा-
द्वसवःसुदानवो विश्वस्मान्नोअं-
हसोनिष्पिपर्तन।३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवन्तु	रक्षन्तु	रक्षा करें
नः	अस्मान्	हम को
पितरः	पितरः	पितर
सुऽप्रवाचनाः	शोभनं प्रवाचनं कीर्तनं येषां ते	सुन्दर कीर्ति वाले
उत	च	और
देवी०	देव्यौ (सुपामितिपूर्वसवर्णदीर्घः)	दो देवियाँ
देवपुत्रे०	देवाः पुत्रस्थानीया ययोस्ते	देवता जिनके पुत्र हैं ऐसी
ऋतऽवृधा	ऋतस्य वर्धयित्र्यौ (विभक्तेरात्वम्)	ऋतकेबढानेवालीं

संस्कृतार्थः।

सुकीर्तयः पितर ऋतस्यवर्धयित्र्यौ देवमातरौ (द्यावापृथिव्यौ) देव्यौ चाऽस्मान् रक्षन्तु, हे कल्याण·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानाः ! वसवः ! अस्मान् सर्वस्मात् पापान्निर्गमय्य रक्षत यथा रथं कठिनात् (मार्गान्निर्गमय्य रक्षन्ति) ॥ ३ ॥

भाषार्थः।

सुन्दर कीर्ति वाले पितर और ऋत के बढाने वाली देवताओं की माताएं (द्यौ और पृथिवी) देवियाँ हमारी रक्षा करें, हे कल्याण के देने वाले वसुदेवताओ ! संपूर्ण पाप से निकालकर हमारी रक्षा करो जैसे रथ को कठिन (रस्ते) से (निकालकर रक्षा करते हैं) ॥ ३ ॥

विश्वेदेवादेवता जगतीछन्दः ।१२।१२।१२।१२।

नराशंसंवाजिनंवाजयन्निह क्षयद्वीरंपूषणंसुम्नैरीमहे । रथंनदुर्गाद्वसवःसुदानवो विश्वस्मान्नो अंहसोनिष्पिपर्तन ।४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नराशंसम्	नरैःशंसितम् (अग्निम्)	मनुष्यों से स्तुति कियेगये(अग्नि)को
वाजिनम्	बलवन्तम्	बलवान को
वाजयन्	पूजयन्तः (वाजयतिः पूजाकर्मा निघं०३।१४,सुपामिति विभक्तेःलुः)	पूजते हुए
इह	इह	यहां
क्षयत्ऽवीरम्	क्षयति प्रशास्ति वीरान् यस्तम् (क्षयतिरैश्वर्यकर्मा निघं०)	वीरों के राजा को
पूषणम्	पूषणम्	पूषा को
सुम्नैः	स्तोत्रैः	स्तोत्रों से
ईमहे	प्राथयामः	हम प्रार्थना करते हैं

संस्कृतार्थः।

अत्र नरैः शंसितं बलवन्तम् (अग्निम्)

पूजयन्तः (वयम्)वीराणां प्रशासितारं पूषणं स्तोत्रैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रार्थयामः,हे कल्याणदानाः! वसवः! अस्मान् सर्व-स्मात् पापान्निर्गमय्य रक्षत यथा रथं कठिनात् (मार्गान्निर्गमय्य रक्षन्ति)॥ ४॥

भाषार्थः।

यहां मनुष्यों से स्तुति किये गये बलवान (अग्नि) का पूजन करते हुए हम शूरवीरों के स्वामी पूषा से स्तोत्रों द्वारा प्रार्थना करते हैं, हे कल्याण के देने वाले वसुदेवताओ! संपूर्ण पाप से निकाल कर हमारी रक्षा करो जैसे रथ को कठिन (रस्ते) से (निकालकर रक्षा करते हैं)॥ ४॥

विश्वेदेवादेवता जगतीछन्दः ।१२।१२।१२।१२।

बृहस्पतेसदमिन्नःसुगंकृधि शं-योर्यत्तेमनुर्हितंतदीमहे। रथंनदु-र्गाद्वसवःसुदानवो विश्वस्मान्नो अंहसोनिष्पिपर्तन ।५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहस्पते	हे बृहस्पते !	हे बृहस्पति
सदम्	सदा	सदा
इत्	एव	ही
नः	अस्मभ्यम्	हमारे लिये
सुऽगम्	सुमार्गम्	सुमार्ग को
कृधि	कुरु	करो
शम्	रोगाणां शमनम् (यास्कः)	रोगों की शान्ति
योः	भयानां यावनं पृथक्करणम् (")	भयों का दूर करना
यत्	यत्	जो
ते	तव	तेरा
मनुःऽहितम्	मनुष्येस्थापितम्	मनुष्य में स्थापन किया हुआ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्	तत्	उस को
ईमहे	याचामहे	हम मांगते हैं

संस्कृतार्थः ।

हे बृहस्पते ! सदैवाऽस्मभ्यं सुमार्गं कुरु, यत् त्वदीयं रोगाणां शमनं भयानाम् (च) पृथक्करणं मनुष्ये स्थापितम् (अस्ति) तत् (वयम्) याचामहे, हे कल्याणदाताः ! वसवः ! अस्मान् सर्वस्मात् पापान्निर्गमय्य रक्षत यथा रथं कठिनात् (मार्गान्निर्गमय्य रक्षन्ति) ॥ ५ ॥

भाषार्थः ।

हे बृहस्पति ! सदा ही हमारे लिये सुमार्ग को करो, जो आपने रोगों की शान्ति (और) भयों का निवारण मनुष्य में स्थापन किया हुआ (है) उसको हम मांगते हैं, हे कल्याण के देने वाले वसुदेवताओ! सम्पूर्ण पाप से निकालकर हमारी रक्षा करो जैसे रथ को कठिन (रस्ते) से (निकालकर रक्षा करते हैं ॥ ५ ॥

बृहस्पति के लिये देखो पृ० २९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वेदेवा देवता जगतीछन्दः ।१२।१२।१२।१२।

इन्द्रंकुत्सोवृत्रहणंशचीपतिंका-
टेनिबाळ्हऋषिरह्वदूतये। रथंनदु-
र्गाद्वसवःसुदानवो विश्वस्मान्नो
अंहसोनिष्पिपर्तन। ६।

इन्द्रम्	इन्द्रम्	इन्द्र को
कुत्सः	कुत्सः	कुत्स
वृत्रऽहनम्	वृत्रस्य हन्तारम्	वृत्रके मारने वालेको
शचीऽपतिम्	बलस्यस्वामिनम्	बलके स्वामी को
काटे	कूपे (निघं० ३।२३)	कूए में

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निऽबाळ्हः	निपतितः (सा०भा०)	गिरा हुआ
ऋषिः	ऋषिः	ऋषि ने
अह्वत्	आहूतवान्	पुकारा
ऊतये	रक्षाऽर्थम्	रक्षाके लिये

संस्कृतार्थः ।

कूपे निपतितः कुत्सऋषिर्वृत्रस्य हन्तारं बलस्य स्वामिनमिन्द्रं रक्षाऽर्थमाहूतवान्, हे कल्याणदानाः ! वसवः ! अस्मान् सर्वस्मात् पापान्निर्गमय्य रक्षत यथा रथं कठिनात् (मार्गान्निर्गमय्य

रक्षन्ति) ॥ ६ ॥

भाषार्थः ।

कूए में गिरे हुए कुत्सऋषि ने वृत्र के मारने वाले बलके स्वामी इन्द्र को पुकारा, हे कल्याण के देनेवाले वसुदेवताओ ! संपूर्ण पाप से निकालकर हमारीरक्षा करो जैसे रथ को कठिन (रस्ते) से (निकालकर रक्षा करते हैं) ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वेदेवादेवतास्त्रिष्टुप्छन्दः ।१११११११११।

देवैर्नो देव्यदितिर्निपातु देव-
स्त्राता त्रायतामप्रयुच्छन् । तन्नो
मित्रोवरुणोमामहन्ता मदितिः
सिन्धुः पृथिवीउतद्यौः ।७।

देवैः	देवैः	देवताओं के साथ
नः	अस्मान्	हम को
देवी	देवी	देवी
अदितिः	अदितिः	अदिति
नि	नितराम्	निपट
पातु	गोपायतु	रक्षाकरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवः	देवः	देव
त्राता	रक्षाभिमानी	रक्षा भिमानी
त्रायताम्	रक्षतु	रक्षा करे
अप्रऽयुच्छन्	अप्रमाद्यन्	प्रमाद को प्राप्त न होता हुआ
तत्	एतत् (एकारलोपश्छान्दसः)	इसको
नः	अस्माकम्	हमारी
मित्रः	मित्रः	मित्र
वरुणः	वरुणः	वरुण
ममहन्ताम्	आद्रियन्ताम्	आदर करें
अदितिः	अदितिः	अदिति
सिन्धुः	सिन्धुः	समुद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पृथिवी	पृथिवी	पृथिवी
उत	च	और
द्यौः	द्यौः	द्यौ

संस्कृतार्थः ।

देवैः (सहिता) अदितिर्देव्यस्मान्नितरां गोपायतु, रक्षाभिमानी देवः (च) अप्रमाद्यन् (सन्) रक्षतु, एतदस्माकम् (अभ्यर्थनम्) मित्रोवरुणोऽदितिः सिन्धुःपृथिवी द्यौश्चाऽऽद्रियन्ताम् ॥ ७ ॥

भाषार्थः ।

देवताओं के सहित अदिति देवी निपट हमारी रक्षा करें (और) रक्षाभिमानी देव प्रमाद रहित होकर रक्षा करें, इस हमारी (प्रार्थना) को मित्र, वरुण, अदिति, समुद्र, पृथिवी और द्यौ आदर करें ॥ ७ ॥

इति षडधिक शततमं सूक्तम् ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
R
Acc. 28076 / 89057
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu